অভিজ্ঞানশকুন্তলম্

Explain In Sanskrit 

(B)

1. ইদং কিলাব্যাজমনোহরং বপু
তপঃ ক্ষমং সাধয়িতুং য ইচ্ছতি ।
ধ্রুবং স নীলোৎপলপত্রধারয়া
শমীলতাং ছেত্তুমৃষির্ব্যবস্যতি ॥ 1.17

**उत्सः** :- 'उपमा कालिदासस्य' कालिदासकविता नवं वयः माद्दिषं दधि सशर्करं पयः' इत्यादिभिः प्रशस्तिभिः लब्धकीर्तिः । महाकवेः कालिदासोस्य सर्वस्वस्वरुपम् अपूर्वं नाटकम् अभिज्ञानशकुन्तलम् नाम । तत्र प्रथमे अङ्के समुपलभ्यते अयं श्लोकः ।

**प्रसङ्गः** :- मृगयाविहारी दुष्यन्तः वैखानसैः आप्यायितः सन महर्षेः कण्वस्य आश्रमं प्रविष्टवान् । तत्र अनसूया-प्रियंवदाभ्यां सह शकुन्तलाम् अपश्यत् । अति कोमलशरीरापि शकुन्तला महर्षिणा आयास-कर्मणि नियुक्ता । एतेन दुष्यन्तेन महर्षेः कण्वस्य असाधुदर्शित्वं दृष्टम् । कथं स महर्षिः असाधुदर्शी इति प्रसङ्गेन दुष्यन्तेन यदुक्तं तदत्र श्लोके विवृतम् - इदमिति ।

**अन्वयः** :- यः ऋषिः अव्याजमनोहरम् इदं वपुः किल तपः क्षमं साधयितुं इच्छति, स ध्रुवं नीलोत्पल-पत्रधारया शमीलतां छेत्तुं व्यवस्यति ।

**व्याख्या** : शकुन्तलायाः शरीरम् अव्याजमनोहरम् स्वभावतः सुन्दरम् । तपश्चरणम् अतीव कठिनं कार्यम् । अनेन शरीरेण आश्रमधर्मपालनरूपं कठोरं कर्मसम्पादनम् असम्भवमेव । तथापि महर्षिः कण्वः शकुन्तलायाः तद्वपुः शरीरं तपःक्षमं साधयितुं तपस्यायाः योग्यं कर्तुम् इच्छति । तस्य इयं प्रचेष्टा कदापि फलवती

न भवति । विषयोऽयम् आख्यायते ध्रुवमिति । नीलोत्पलस्य पत्रं सुकोमलम् । शमीलता च तदपेक्षया कठिना । नीलपद्मस्य पत्रधारया शमीलताच्छेदनं अतीव दुःसाध्यम । तथापि यदि कोऽपि तत् कर्तुं चेष्टते, तर्हि तस्य अदूरदर्शित्वमेव प्रकटीभवेत् इति । महर्षिः कण्वः अतिकोमलाङ्गिन्या शकुन्तलया कठोरं तपस्याकर्म सम्पादयितुं यदिच्छति तेन तस्य अदूरदर्शित्वमेव प्रकटितमिति ।

अतः शकुन्तलाम् आश्रमधर्मपालनात् विरमय्य संसारधर्मपालने प्रवृत्तीकरणमेव महर्षेः उचितमिति दुष्यन्तस्य अभिप्रायः । अत्र समस्त-वाक्ये असम्भवद् वस्तुसम्बन्धरूपा निदर्शना, अव्याजमनोहरम् इत्यत्र विभावना, ध्रुवमिति उत्प्रेक्षा-लङ्कारः । वंशस्थविलं वृत्तम् । तस्य लक्षणम् — 'वदन्ति वंशस्थविलं जतौ जरौ इति ।'

(২) সরসিজমনুবিদ্ধং শৈবলেনাপি রম্যং
মলিনমপি হিমাংশোর্লক্ষ্ম লক্ষ্মীং তনোতি ।
ইয়মধিকমনোজ্ঞা বল্কলেনাপি তন্বী
কিমিব হি মধুরাণাং মণ্ডনং নাকৃতীনাম্ ॥ 1.18

**উৎস :** মহাকবেঃ কালিদাসস্য সর্বশ্রেষ্ঠরূপম্ অপূর্বং নাটকম্ অভিজ্ঞানশাকুন্তলম্ নাম । তত্র প্রথমে অঙ্কে সমুপলভ্যতে অয়ং শ্লোকঃ ।

**প্রসঙ্গঃ:** মৃগয়াবিহারী রাজা দুষ্যন্তঃ বৈখানসৈঃ আপ্যায়িতঃ সন্ মহর্ষেঃ কণ্বস্য আশ্রমং প্রবিষ্টবান্ । তত্র অনসূয়া প্রিয়ংবদাভ্যাং সহ বল্কলং পরিহিতাং শকুন্তলাম্ অপশ্যৎ । শকুন্তলা অপরূপা লাবণ্যবতী । বল্কলং তস্যাঃ শরীরস্য অনুপযুক্তম্ । তথাপি তৎ কথম্ অলংকারং শোভাং বর্ধয়তি তদ্বর্ণনা প্রসঙ্গেন দুষ্যন্তেন যদুক্তং তদত্র শ্লোকে বিবৃতম্ — সরসিজমিতি ।

**অন্বয়: :-** শৈবলেন অনুবিদ্ধম্ অপি সরসিজম্ রম্যং । মলিনম্ অপি লক্ষ্ম হিমাংশোঃ লক্ষ্মীম্ তনোতি । বল্কলেন অপি ইয়ং তন্বী অধিক মনোজ্ঞা । হি মধুরানাম্ আকৃতীনাম্ কিম্ ইব মণ্ডনং ন (ভবতি) ।

**ব্যাখ্যা :-** শৈবলেন জলনীলিকা নাম তৃণভেদেন, অনুবিদ্ধং বেষ্টিতম্ অপি সরোস্যাং সরোবরে জাতম্ উৎপন্নম্ ইতি । সরসিজং পদ্মঃ, রম্যং মনোহরম্ । লক্ষ্মং চিহ্নং কলঙ্কং ইতি যাবৎ । মলিনম্ অপি কৃষ্ণবর্ণম্ অপি হিমাংশোঃ চন্দ্রস্য লক্ষ্মীং শোভাং তনোতি বিস্তারয়তি । বল্কলেনাপি তন্বী কৃশাঙ্গী ইয়ং পুরোদৃশ্যমানা শকুন্তলা, অধিকং

মনোজ্ঞা মনোজ্ঞরা ইতি । এতানি সর্বাণি সমালোক্য মন্যে অহং দুষ্যন্তঃ । মধুরাণাং স্বভাবতঃ সুন্দরানাম আকৃতীনাম কিমিব হি মণ্ডনং ভূষণং ন ? অপি তু সর্বং ভূষণতাং প্রপদ্যতে ইতি ।

যৎ খলু স্বভাবসুন্দরং তস্য অন্যেন বস্তুনা সৌন্দর্যবিধানম অকিঞ্চিৎকরমেব । অসুন্দরবস্তুনঃ সন্নিধানে অপি তস্য সৌন্দর্যহানিঃ ন জায়তে, অপি তু বৃদ্ধিং গচ্ছতি । পদ্মং সুন্দরম, শৈবলেন অনুবিদ্ধম্ অপি তৎ রমণীয়ম । চন্দ্রে কলঙ্কমস্তি । মলিনমপি তৎ চন্দ্রস্য শোভাং বর্ধয়তি । শকুন্তলায়াঃ বল্কলবসনং ন তস্যাঃ শরীরলাবণ্যম অপাকরোতি । শরীরলাবণ্যম অপার্থিবম । তথাপি তেন বল্কলেনৈব শকুন্তলা উপযুক্তম । তথাপি তেন বল্কলেনৈব শকুন্তলা অধিকং মনোহারিণী সঞ্জাতা । অতঃ নিসর্গতঃ সুন্দরবস্তুনঃ আত্মনিরপেক্ষসৌন্দর্যস্য নাস্তি প্রয়োজনম্ । সুন্দরম অসুন্দরং বা যদেব বস্তু তেন সহ যুক্তং ভবেৎ তদেব তস্য অলংকারশোভাং ~~অ~~ তনোতি ইতি ।

অত্র মালাপ্রতিবস্তূপমা, অর্থান্তরন্যাসঃ, অর্থাপত্তিঃ, বৃত্ত্যনুপ্রাসঃ, ছেকানুপ্রাস ইতি অলংকারাঃ । অত্র মালিনীবৃত্তম্ । তস্য লক্ষণং —

— 'ন ন ম য য যুতেয়ং মালিনী ভোগিলোকৈঃ ।'

ইতি ।

(৩) মানুষীষু কথং বা স্যাদস্য রূপস্য সম্ভবঃ ।
ন প্রভাতরলং জ্যোতিরুদেতি বসুধাতলাৎ ॥ 1.23

উৎস :- মহাকবেঃ কালিদাসস্য সর্বশ্রেষ্ঠ স্বরূপম্ অপূর্বং নাটকম্ অভিজ্ঞানশকুন্তলম্ নাম । তত্র প্রথমে অঙ্কে সমুপলভ্যতে অয়ং শ্লোকঃ ।

প্রসঙ্গ :- হস্তিনাপুরস্য রাজা দুষ্যন্তঃ মৃগয়ার্থং মহর্ষেঃ কণ্বস্য তপোবনম্ আগতঃ । তত্র আশ্রমে মহর্ষেঃ পালিতাং কন্যাং শকুন্তলাং দৃষ্ট্বা তস্যাম্ অতীব আসক্তঃ জাতঃ । পরন্তু দুষ্যন্তঃ শকুন্তলায়া সহ বিবাহ বিষয়ে দ্বিধান্বিতঃ আসীৎ । তদানীন্তন কালে ক্ষত্রিয়েন সহ ব্রাহ্মণকন্যায়াঃ বিবাহঃ সমাজে স্বীকৃতঃ নাসীৎ । ততঃপরম্ অনসূয়ামুখাৎ 'শকুন্তলা অপ্সরা সম্ভবা' ইতি জ্ঞাত্বা রাজা নিশ্চিন্ত জাতঃ । তদা শকুন্তলায়াম্ আবির্ভূতস্য রূপস্য ঔচিত্যপ্রসঙ্গেন দুষ্যন্তেন উক্তম্ — মানুষীষু ইতি ।

অন্বয়ঃ :- অস্য রূপস্য সম্ভবঃ মানুষীষু কথং বা স্যাৎ ? প্রভাতরলং জ্যোতিঃ বসুধাতলাৎ ন উদেতি ।

ব্যাখ্যা :- অস্য ঈদৃশস্য রূপস্য সৌন্দর্যস্য লাবণ্যস্য বা, সম্ভবঃ উৎপত্তিঃ । মানুষীষু মানবীষু মানবী-গর্ভজাতাসু ইত্যর্থঃ । কথং কেন প্রকারেন বা স্যাৎ ভবেৎ ইতি । প্রভাতরলং প্রভায়া দীপ্ত্যা তরলং চঞ্চলং জ্যোতিঃ বিদ্যুৎ ইত্যর্থঃ । বসুধাতলাৎ ভূপৃষ্ঠাৎ ন উদেতি ন প্রকটী ভবতি ন উদ্গতা ভবেদিত্যর্থঃ ।

শকুন্তলা অপ্সরসঃ মেনকায়াঃ কন্যা । অস্মাৎ কারণাৎ তস্যাং স্বর্গীয় সৌন্দর্যম্ আবির্ভূতম্ ।

Scanned by CamScanner

মানবীগর্ভজাতায়াং কন্যায়াং সর্বৈ ঈদৃশ-রূপলাবণ্যস্য সম্ভবঃ কদাপি ন স্যাৎ। বিদ্যুৎ যথা কদাপি ভূতলাৎ ন জায়তে, তদ্রূপম পৃথিব্যাঃ নার্য্যাঃ উৎপন্নায়াং কন্যায়াং সর্বৈ স্বর্গীয়ং লাবণ্যং ন সঞ্জায়তে। অপ্সরাসম্ভবাদেব শকুন্তলা এবং লাবণ্যময়ী রূপেণ জাতা ইতি দুষ্মন্তস্য অভিপ্রায়ঃ।

অত্র অপ্রস্তুতপ্রশংসা নাম অলংকারঃ, অনুষ্টুপ ছন্দশ্চ।

---